# Mahashastranugrahakavacham

# મહાશાસ્ત્રનુગ્રહકવચમ્

## Document Information

Text title : mahAshAstranugrahakavacham

File name : mahAshAstranugrahakavacham.itx

Category : deities_misc, ayyappa, kavacha

Location : doc_deities_misc

Proofread by : PSA Easwaran

Description/comments : From Shastrarchana, Kannada publication

Latest update : July 10, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 3, 2023

*sanskritdocuments.org*

# મહાશાસ્ત્રનુગ્રહકવચમ્

શ્રીગણેશાય નમઃ ।
અથ મહાશાસ્ત્રનુગ્રહકવચં પ્રારભ્યતે ॥

શ્રીદેવ્યુવાચ
ભગવન્ દેવદેવેશ સર્વજ્ઞ ત્રિપુરાન્તક ।
પ્રાપ્તે કલિયુગે ઘોરે મહાભૂતૈઃ સમાવૃતે ॥ ૧॥

મહાવ્યાધિમહાવ્યાળઘોરરાજૈઃ સમાવૃતે ।
દુઃસ્વપ્નઘોરસન્તાપૈઃ દુર્વિનીતૈઃ સમાવૃતે ॥ ૨॥

સ્વધર્મવિરતે માર્ગે પ્રવૃત્તે હૃદિ સર્વદા ।
તેષાં સિદ્ધિં ચ મુક્તિં ચ ત્વં મે બ્રૂહિ વૃષધ્વજ ॥ ૩॥

ઈશ્વર ઇવાચ
શ ृણુ દેવિ મહાભાગે સર્વકલ્યાણકારણે ।
મહાશાસ્તુશ્ચ દેવેશિ કવચં પુણ્યવર્ધનમ્ ॥ ૪॥

અગ્નિસ્તમ્ભજલસ્તમ્ભસેનાસ્તમ્ભવિધાયકમ્ ।
મહાભૂતપ્રશમનં મહાવ્યાધિનિવારણમ્ ॥ ૫॥

મહાજ્ઞાનપ્રદં પુણ્યં વિશેષાત્કલિતાપહમ્ ।
સર્વરક્ષાકરં દિવ્યમાયુરારોગ્યવર્ધનમ્ ॥ ૬॥

કિમતો બહુનોક્તેન યં યં કામયતે દ્વિજઃ ।
તં તમાપ્નોત્યસન્દેહો મહાશાસ્તુઃ પ્રસાદતઃ ॥ ૭॥

કવચસ્ય ઋષિર્બ્રહ્મા ગાયત્રીશ્છન્દ ઉચ્યતે ।
દેવતા શ્રીમહાશાસ્તા દેવો હરિહરાત્મજઃ ॥ ૮॥

ષડઙ્ગમાચરેદ્ભક્ત્યા માત્રયા જાતિયુક્તયા ।
ધ્યાનમસ્ય પ્રવક્ષ્યામિ શ ृણુષ્વાવહિતા પ્રિયે ॥ ૯॥

અસ્ય શ્રીમહાશાસ્તુઃ કવચસ્તોત્રમહામન્ત્રસ્ય બ્રહ્મા ઋષિઃ ।
ગાયત્રીઃ છન્દઃ । મહાશાસ્તા દેવતા ।
(હ્રાં)પ્રાં બીજમ્ । (હ્રીં)પ્રીં શક્તિઃ । (હ્રૂં)પ્રૂં કીલકં
શ્રીમહાશાસ્તુઃ પ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ।
(હ્રાં)પ્રાં ઇત્યાદિ ષડઙ્ગન્યાસઃ ॥

અથ ધ્યાનમ્ ।
તેજોમણ્ડલમધ્યગં ત્રિનયનં દિવ્યામ્બરાલઙ્કૃતં
દેવં પુષ્પશરેક્ષુકાર્મુકલસન્માણિક્યપાત્રાભયમ્ ।
બિભ્રાણં કરપઙ્કુજે મદગજસ્કન્ધાધિરૂઢં વિભું
શાસ્તારં શરણં વ્રજામિ સતતં ત્રૈલોક્યસમ્મોહનમ્ ॥

(લમિત્યાદિ પઞ્ચોપચારપૂજા ।)
મહાશાસ્તા શિરઃ પાતુ ભાલં હરિહરાત્મજઃ ।
કામરૂપી દૃશૌ પાતુ સર્વજ્ઞો મે શ્રુતી સદા ॥ ૧॥

ઘ્રાણં પાતુ કૃપાધ્યક્ષો મુખં ગૌરીપ્રિયઃ સદા ।
વેદાધ્યાયી ચ મે જિહ્વાં પાતુ મે ચિબુકં ગુરુઃ ॥ ૨॥

કણ્ઠં પાતુ વિશુદ્ધાત્મા સ્કન્ધૌ પાતુ સુરાર્ચિતઃ ।
બાહૂ પાતુ વિરૂપાક્ષઃ કરૌ તુ કમલાપ્રિયઃ ॥ ૩॥

ભૂતાધિપો મે હૃદયં મધ્યં પાતુ મહાબલઃ ।
નાભિં પાતુ મહાવીરઃ કમલાક્ષોઽવતાત્કટિમ્ ॥ ૪॥

અપાનં  પાતુ વિશ્વાત્મા ગુહ્યં ગુહ્યાર્થવિત્તમઃ ।
(સમીપં પાતુ વિશ્વેશો ગુહ્યં ગુહ્યાર્થવિત્સદા)
ઊરૂ પાતુ ગજારૂઢો વજ્રધારી ચ જાનુની ॥ ૫॥

જઙ્ઘે પાશાઙ્કુશધરઃ પાદૌ પાતુ મહામતિઃ ।
સર્વાઙ્ગં પાતુ મે નિત્યં મહામાયાવિશારદઃ ॥ ૬॥

ઇતીદં કવચં પુણ્યં સર્વાઘૌઘનિકૃન્તનમ્ ।
મહાવ્યાધિપ્રશમનં મહાપાતકનાશનમ્ ॥ ૭॥

જ્ઞાનવૈરાગ્યદં દિવ્યમણિમાદિવિભૂષિતમ્ ।
આયુરારોગ્યજનનં મહાવશ્યકરં પરમ્ ॥ ૮॥

યં યં કામયતે કામં તં તં પ્રાપ્નોત્યસંશયઃ ।

ત્રિસન્ધ્યં યઃ પઠેદ્વિદ્વાન્ સ યાતિ પરમાં ગતિમ્ ॥ ૯॥

ઇતિ શ્રીગુહ્યરત્નચિન્તામણૌ શ્રીમહાશાસ્ત્રનુગ્રહકવચં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Mahashastranugrahakavacham*

pdf was typeset on February 3, 2023

Please send corrections to *sanskrit@cheerful.com*